# ॥ અમ્બાપઞ્ચરત્નસ્તોત્રમ્ ॥

.. ambApa ncharatnastotram ..

sanskritdocuments.org

August 20, 2017

# .. ambApa ncharatnastotram ..

# ॥ અમ્બાપઞ્ચરત્નસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : Amba Pancharatna Stotra

File name : ambApancharatnastotram.itx

Category : pancharatna, devii, pArvatI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ અમ્બાપઞ્ચરત્નસ્તોત્રમ્ ॥

અમ્બાશમ્બરવૈરિતાતભગિની શ્રીચન્દ્રબિમ્બાનના
બિમ્બોષ્ઠી સ્મિતભાષિણી શુભકરી કાદમ્બવાટ્યાશ્રિતા ।
હ્રીઙ્કારાક્ષરમન્ત્રમધ્યસુભગા શ્રોણીનિતમ્બાઙ્કિતા
મામમ્બાપુરવાસિની ભગવતી હેરમ્બમાતાવતુ ॥ ૧॥

કલ્યાણી કમનીયસુન્દરવપુઃ કાત્યાયની કાલિકા
કાલા શ્યામલમેચકદ્યુતિમતી કાદિત્રિપઞ્ચાક્ષરી ।
કામાક્ષી કરુણાનિધિઃ કલિમલારણ્યાતિદાવાનલા
મામમ્બાપુરવાસિની ભગવતી હેરમ્બમાતાવતુ ॥ ૨॥

કાઞ્ચીકઙ્કણહારકુણ્ડલવતી કોટીકિરીટાન્વિતા
કન્દર્પદ્યુતિકોટિકોટિસદના પીયૂષકુમ્ભસ્તના ।
કૌસુમ્ભારુણકાઞ્ચનામ્બરવૃતા કૈલાસવાસપ્રિયા
મામમ્બાપુરવાસિની ભગવતી હેરમ્બમાતાવતુ ॥ ૩॥

યા સા શુમ્ભનિશુમ્ભદૈત્યશમની યા રક્તબીજાશની
યા શ્રી વિષ્ણુસરોજનેત્રભવના યા બ્રહ્મવિદ્યાઽઽસની ।
યા દેવી મધુકૈટભાસુરરિપુર્યા માહિષધ્વંસિની
મામમ્બાપુરવાસિની ભગવતી હેરમ્બમાતાવતુ ॥ ૪॥

શ્રીવિદ્યા પરદેવતાઽઽદિજનની દુર્ગા જયા ચણ્ડિકા
બાલા શ્રીત્રિપુરેશ્વરી શિવસતી શ્રીરાજરાજેશ્વરી ।
શ્રીરાજ્ઞી શિવદૂતિકા શ્રુતિનુતા શૃઙ્ગારચૂડામણિઃ
મામમ્બાપુરવાસિની ભગવતી હેરમ્બમાતાવતુ ॥ ૫॥

અમ્બાપઞ્ચકમદ્ભુતં પઠતિ ચેદ્યો વા પ્રભાતેઽનિશં
દિવ્યૈશ્વર્યશતાયુરુત્તમમિદં વિદ્યાં શ્રિયં શાશ્વતમ્ ।
લબ્ધ્વા ભૂમિતલે સ્વધર્મનિરતાં શ્રીસુન્દરીં ભામિનીં
અન્તે સ્વર્ગફલં લભેત્સ વિબુધૈઃ સંસ્તૂયમાનો નરઃ ॥ ૬॥

ઇતિ અમ્બાપઞ્ચરત્નસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. ambApa ncharatnastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*